Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SISRRJ | Volume 1 | Issue 1 | ISSN : 2581- 6306

# शास्त्रे वृत्ति निरूपणम्



**डॉ0 सुभाष चन्द्र मीणा**
सहायकाचार्यः, व्याकरण विभाग,
केन्द्रीय संस्कृत विश्वविद्यालयः,
क0जे0सोमैया परिसर, मुम्बई, भारत।

सारांशः –शब्दास्यायमर्थः इत्येवरूप्यां व्वविच्छिद्यते व्यावर्त्त्योपदिश्यते, न तु आधुनिक–शब्दवत् स्वयं सङ्केत्यते येन पौरुषेय त्वापेक्षा स्यात् इति। अतः वृत्ति सम्पूर्ण शब्दस्यार्थ इति कथ्यते।
मुख्यशब्दः –शास्त्रम्, वृत्तिः, आचरणम्, प्रवर्तम्, व्यापारः, स्वभावः, कार्यम्, व्याकरणम् संस्कृतम्।

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जन शलाकया।**
**चक्षुरून्मीलितं येन तस्मै श्रीगुरवे नमः।**
**वृत्तयः काव्यसरणावलङ्कारप्रबन्धृभिः**
**अमिधा लक्षणा व्यक्तिरिति तिस्त्रो निरूपिता।।**[1]

वृत्ति इति शब्दस्य नानार्थको वर्तते– यथा जीविका, व्यवहारः आचरणम्, प्रवर्तम्, व्यापारः, स्वभावः, कार्यम् इत्यादयः परन्तञ्च शास्त्रे वृत्याः अनेकानां महावैयकरणानां स्वस्व मते उल्लेखितं, वृत्ति शास्त्रे महत्त्वपूर्ण वर्तते अनेन शब्दस्य व्यावहारिक प्रयोग वयं शास्त्रे प्राप्यते। वृतु–वर्तने इतिधातो 'स्त्रियां क्तिन्' इति सूत्रेण क्तिन् प्रत्ययः[2] विधीयते। ततः सुबुत्पत्तौ वृत्तिः रूपं निष्पन्नम्। संस्कृत शास्त्रे वृत्तिशब्दस्य बहवोऽर्थाः वर्तन्ते। बह्वर्थकः वृत्तिशब्द लोके जीविका इत्यर्थे प्रयुज्यते। अस्य वृत्तिः का? इति प्रश्ने अस्य अध्यापनवृत्तिः इति समाधानमुपलभ्यते। शास्त्रेषु वृत्तिशब्दोऽयं नानार्थकः। लोके इव शास्त्रेऽपि वृत्ति शब्दः जीविकार्थे प्रयुक्तो दृश्यते। वृत्तिशब्दस्य व्यवहार इत्यर्थ दृश्यते। वृत्तिशब्दस्य व्यापार इत्यर्थः दृश्यते। चित्तस्य अवस्थाविशेषः गम्यते। संहितायां पदानां स्थितिः इत्यर्थे वर्तते। स्वभावः इत्यर्थ उपलभ्यते। धातुनिष्पन्नं क्रियापदं इत्यर्थे वृत्तिशब्दः प्रयुक्त। अर्थविवरणं वृत्तिरिच्युच्यते। काशिकावृत्तिः, भाषावृत्ति अत्र ग्रन्थानामपि वृत्तिशब्देन व्यवहारः दृश्यते।

अप्रतिबन्धः इति सिद्धान्तकौमुद्याम् उक्तम्।[3] द्रुतमध्यमविलम्बितरूप उच्चारणक्रमः इत्यर्थः। महाभाष्ये परपशाह्निके वर्णोयदेशाधिकरणे वृत्ति समवायार्थ उपदेशः इति समाहितम्।[4] परार्थाभिधानं वृत्ति इति उक्तम्। 'सिद्धे शब्दार्थ सम्बन्धे' इत्यादि[5] प्रमाणिक शाब्दिकाचार्यवचनै र्यद्यपि विज्ञायते यत् शाब्दिकानां पर मासिद्धान्ते शब्दार्थ सम्बन्धा नित्या एव। वाक्यमेव च वाक्यार्थे शक्तिमद् भवति, यतो व्याकरणनिर्माणात् पूर्वमपि तत् तदर्थे तथा–तथा वाक्यप्रयोगा भवन्त आसन्नेव। 'पदसमूहो वाक्यमर्थसमाप्तौ (न्यायसूत्रम् 2.1.55) इति वात्स्यानेन[6] वाक्यस्य वाक्यार्थ शक्तत्वे प्रमाणं भवति; तथापि शब्दनित्यत्पक्षे शब्द शास्त्रं नातीव प्रयोजनवत्। प्रतिवाक्यमर्थान्वाख्यानं शब्दनित्यत्वपक्षेऽसम्भवदक्तिकमेव। अनेकार्थत्वम् एकार्थत्वश्च समानदशायां न भवतः, किन्तु भिन्नदशायामेव। अर्थादेकस्यामवस्थायां यस्यानेकार्थत्वं तस्यैवान्यस्यामवस्थायामेकार्थत्वम्। अर्थस्यैकत्वानेकत्वे ज्ञानापेक्षया। अपृथगुपस्थितिविषयत्वमेकार्थीभावः। तत्रावस्थाभेदेन समन्वयः। अयं भावः एकार्थी भावः इति। एवञ्चैकार्थीभावः अर्थानां प्रवर्तते। किन्तु समासिादिसञ्ज्ञा नार्थसम्बन्धिन इत्यतः कथं तत्र एकार्थी भावो घटते इति शङ्कायाम्, अर्थानामेकत्वानेकत्वयोः सिद्धः एकार्थी भावः अर्थद्वारा शब्देषु अशिरूते। एवं स्थिते तत्र कस्यामवस्थायामनेकार्थत्वम्, कस्याञ्चावस्थायामेकार्थ त्वमित्यंशः परिशीलनीयः। तत्र 'समर्थः पदविधिः' इति सूत्रेण भाष्ये वाक्ये पृथगर्थानि राज्ञः पुरुषः इति। समासे पुनरेकार्थानि राजपुरुष इति स्पष्टमुक्तम्। पदान्वारव्यानं तेन च वाक्यान्वारव्यानम् अभिधादि समासादि वृत्ति अन्वाख्यानञ्च 'वृद्धिरादैच्'[7] प्रातिपदिकार्थ लिङ्गपरिमाण वचन मात्रे प्रथमा' 'कर्मणि द्वितीया'[8] (पा0 2.3.2) भूवादयो धातवः (पा0 1.3.1) लः कर्मणि च भावे चाकर्मकेभ्यः' (पा0 3.6.69) अनेकम–पदार्थे– 2.2.24,[9] इत्याद्यष्टाध्यायीसूत्रप्रणयनेन विहितवान्।

पदार्थस्य ज्ञाने पदशक्तिज्ञानं सहकरोति। वाक्यावस्थायां भिन्नानि पदानि शक्तिग्रहसहकारेण अर्थोपस्थापकानि भवन्ति। तत्र राजपदं राजत्वावच्छिन्ने शक्तम्; पुरुष पदं पुरुषत्वावच्दिन्ने शक्तमिति रीत्या विभिन्नैः शक्तिग्रहैर्विभिन्ना अर्था उपस्थिता भवन्ति। अनया रीत्या वाक्यावस्थायां पदानि पृथगर्थानि। एतादृशानामेकार्थत्वं समासादौ लभ्यते। यथा–समासचिकीर्षायां राजपदस्य निरर्थकत्वभङ्गीकृत्य पुरुषपदस्यैव राजत्वावच्छिन्नसम्बन्ध्य भिन्नपुरुषे शक्तिः कल्पनीया। राजपदसहचरितं पुरुषपदं राजसम्बन्ध्य भिन्नपुरुषे शक्तिमिति शक्तिग्रहाकारः प्रदर्शनीयः। अत्र राजपदं तात्पर्य ग्राहकं भवति। एवमर्थानाम् पृथग् उपस्थिति विषयत्वं सिध्यति। अतः पद द्वय बोध्ययोरर्थयो रेकपदबोध्यत्वमेकार्थीभावः इति निर्दुष्टं लक्षणं वक्तुं शक्यते।

यथा कूपे हस्तपक्षिणः पन्था अभ्रे चन्द्रमसं पथ्येत्पादौ स्वायाब्सिद्धस्यैव पथश्चन्द्रस्य च कूपोडभ्रञ्च निमित्त तत्वेन आश्रीयते; तथैव स्वभावसिद्धस्यैवार्थस्य शास्त्रेणा–वाख्यानं क्रियते। यतः शब्दानां शास्त्र निष्पाद्यताज्ञानमन्तरा शास्त्रानिष्पाद्यता अर्थात् नित्यता नावगता भवितुं शक्नोति, द्वैतज्ञान मन्तरा नाऽद्वैतं

संविज्ञातं भवति, लक्ष्यसीमानधिगन्तु क्रमिक–सोपान परम्परा निर्मेया भवति। तत्र पूर्व पूर्वसोपानारोहणे विहिते एवोत्तरोन्तरमधिरोढुं शक्या भवतीत्त्याशयः।

**"भूमिमधरा मितराधिरोढुं शक्येति शास्त्रमपि कारणकार्यभावम्।"**[10]

समाश्रितेऽस्मिन् शास्त्रनिष्पाद्यतापक्षे शास्त्रैक गम्यत्वाद् वृत्तिस्वरूपनिरूपणमपि प्रयोजनवत्, शास्त्रज्ञानं विनापि पदार्थ ज्ञानसत्तवेऽपि शास्त्रज्ञानान्वितप्रयोगस्याभ्युदय कारित्वत्।[11]

कार्यशाब्दिकाः वाक्यदेव विकल्पेन वृत्ति निष्पाद्यां मन्यमानाः किं लक्षणुं कुर्वन्ति इत्याशयेन महाभाष्ये शङ्का कृता–अथ ये वृत्तिं वर्तयन्ति किं त आहुः इति। ततः परार्थाभिधानं तस्याभिधानं वृत्तिरित्याहुः– इति समाहितम्। परस्य शब्दस्य योऽर्थः तस्याभिधानं शब्दान्तरेण यत्र सा वृत्तिरित्यर्थः। यथा राजपुरुषः इत्यत्र राजशब्देन वाक्यावस्थायामनुक्त पुरुषार्थः अभिधीयते इति तद् भाष्या शय कैयट स्पष्टः। ततः किं तत्र जहत्स्वार्था वृत्तिः समाश्रीयते उत उजहत्स्वार्था इति प्रश्ने जहस्वार्था वृत्तिरेव समाश्रीत्यते इति समाहितम्। तत्र च दृष्टान्तः– पुरुषोऽयं परकर्मणि प्रवर्तमानः स्वकर्म जहाति। तद्यथा– तक्षः वर्तमानः स्वमर्थं जहाति– इति।

'एक शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति' (पा0 6.1.84)[12] पतञ्जलि उक्तम् शब्द नित्यतापक्षे 'सर्वे सर्वार्थवाचकाः' इत्यपि सिद्धान्तः तथापि तस्य योगिगम्यत्वाद् अयोगिनोऽस्मदादेस्तथा प्रात्यक्षिकानु भवासम्भवः। अतः हरिणा वाक्यपदे उक्तं च– 'शब्दः स्वार्थे[13] व्यवस्थितः' इति। शब्दस्य स्वार्थे व्यवस्थि तत्वाच्च न शब्दार्थसम्बन्धस्य नित्यताााहानिरित्याशयः। अतः जगति खलु कैश्चित् पदविशेषैः केषाञ्चित् पद विशेषणामेव ज्ञानमुत्पद्यते, न तु सर्वैः पदैः सर्वेषामेव पदार्थानां ज्ञानं भवति। अथ विश्वस्मिन् विश्वे विद्यमानपदार्थाः ज्ञानं भवति। अथ विश्वस्मिन् विश्वे विद्यमान पदार्थाः सुव्यवस्थिताः दृश्यन्ते। व्यवस्थायाश्चास्याः कारणमेक मागं पद पदार्थ सम्बन्ध एवं वक्तुं जायते। अतो 'घट' शब्देन कम्बुग्रीवादिभतो घटव्यक्तिरूपस्यार्थस्यैव बोधो जायते, न तु पटादिव्यक्तेरन्यस्य कस्यचित्।

'समर्थः पदविधिः'[14] (2.1.1) इति सूत्रे पदविधि शब्दस्य पदोद्देश्यकविधिरित्यर्थः कृत्तद्धितसमासैकशेषसनाद्यन्तधातूनां पदोद्देश्यकविधित्वेन तेषामेवात्र सूत्रे पदविधिशब्देन ग्रहणम्। अत्र सूत्रे सङ्गतश्चासौ अर्थश्च समर्थः इति व्युत्पत्तिराश्रयणीया। सङ्गतः एकीभूतः इत्यर्थः। समर्थ शब्दस्य एकीभूतार्थबोधक–शब्दाश्रितः इत्यर्थ स्वीकरणीयो लक्षणया। यद्यपि एकार्थी भावः इति नाम्ना महर्षिणा पाणिनिना न उक्तम्; किन्तु अयमभिप्रायः सूत्रारूढः इति भाष्यवार्तिकाभ्यां लभ्यते। कश्चात्र सम्बन्धः पदपदार्थयोर्मध्ये भवितुं शक्यः? संयोगः, समवायो; व्याप्त्याख्यो वेति विचार्थते। न तावत् संयोगसम्बन्धो भवितुमर्हति, प्रत्यक्षप्रामाण्यात्। येन इन्द्रियेण यौ पदार्थौ गृह्येते। तेन इन्द्रियेण तयोः सम्बन्धोऽपि– इत्यस्ति नियमः।

यथा घट–भूतलयोः[15], अग्नि–पर्वतयोः, धूमपर्वतयोररस्ति संयोग सम्बन्धः। अत्र सर्वत्र द्रव्य–पदार्थयोः प्रत्यक्षं चक्षुरिन्द्रियेण भवति। अतस्तयोः संयोग सम्बन्धोऽपि चक्षुरिन्द्रियेणैव गृह्यते। परं शब्द–शब्दार्थयोः तावन्नास्ति तादृशी स्थितिः। पदात्मकः शब्दः श्रौत्रेन्द्रियेण गृह्यते, विषयात्मकोडर्थश्च नैव, श्रवणेन्द्रियग्राह्यः। अतो नैव तत्र समान सम्बन्धा भावात्– भवति संयोग सम्बन्ध।

संयोगलक्षम्[16] उक्तं– 'अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितिः।' तदपि नैव संघटते। पद–पदार्थयोः प्राप्तिलक्षणसंयोगात्मक सम्बन्धे गृह्यमाणे किं घटाद्यर्थः शब्दान्तिके भवति, शब्दो वाऽर्थन्तिके भवति? घट पटाद्यथो यदि शब्दसमीपे स्यात् तदा शब्दस्य मुखे जायमानत्वात् अग्निशब्दोच्चारणे सति मुखे दाहापत्तिः, गुडादि–शब्दोच्चारणे मुखे माधार्यापत्तिः, खगशब्दोच्चारणे मुखच्छेदनापत्तिश्च स्यात्। न चैवमनुभूयते। तस्मान्नास्त्यं शब्दार्थयोः सम्बन्ध। अस्तु अर्थान्तिके शब्दो भवतु– इत्यपि पक्षो विचारणीयः। तथा हि भूतसादौ घटादिपदार्थो भवति, तत्र शब्दोच्चारणसाधनस्य मुख्यस्यासत्तवात् शब्दास्योच्चारणमसम्भवम्, शब्दस्य स्थानानि कण्ठादीनि करणानि च बाह्याभ्यन्तरप्रयत्नविशेषाः। पदार्थदेशे च तौ नैव भवतः। तस्मात् पद–पदार्थयोः प्राप्तिलक्षणः संयोग सम्बन्धनो चोपपद्यते। एतत् इति एव समवाय–व्याप्तिसम्बन्धयोरपि गतिरवगन्तया।

समर्थः[17] पदविधिः (2.1.1) इति सत्रे भाष्ये किं समर्थन्नाम इति आशङ्क्य पृथक् अर्थानां पदानाम एकार्थीभावः समर्थमित्युच्यते–इति समाहितम्। पृथगर्थाः येषां पदानां तानि पृथगर्थानि पदानि वाक्यैः राज्ञः पुरुषः इत्यत्र राजशब्दः राजार्थमेव आचष्टे इति द्वयोरेकार्थी भावः इति फलितम्। ततः कस्तर्हि एकार्थी भावकृतीविशेषः इत्याशङ्क्य सुब्लोपो, व्यवधानम्, यथेष्टमन्यतरेणाभिसम्बन्धः स्वर इति इत्येषम् एकार्थी भाव प्रयोजनानि प्रतिपादितानि। तथा हि– सुब्लोपे भवति वाक्ये–राज्ञः पुरुषः इति। समासे तु न भवति–राजपुरुष इति। राज्ञः पुरषः इति वाक्ऱै भेदाधिष्ठानसम्बन्धस्य प्रतिपादियिषित्वात् बिना विभक्त्या तस्य प्रत्याययितुमशक्यत्वात् नास्ति सुः लोपः। समासे तु भेदनिवृत्तौ तदाश्रयस्य सम्बन्धस्य उपरमात् स्वाभाविकी सुपो निवृत्तिः। तदेवं सुपः भावभावाभ्यामर्थस्य भावाभावा नुभवनं वाक्यसमासयोः। व्यवधानं भवति वाक्ये–राज्ञः ऋध्स्य पुरुषः इति। समासे तु न भवति। ऋद्धस्येत्यस्य राजसमानाधिकरणत्वेन ऐकार्थ्यात् अव्यवधायकत्वं यदि मन्यते तर्हि–भार्याः राज्ञः पुरुषो देवदत्तस्य इत्युदाहरणमत्र स्वीकरणीयम्। भार्या देवस्तस्य इत्यस्य मध्ये राज्ञः पुरुषः इत्यनेन व्यवधानमिति भावः।

शाब्दकारणभूता वृत्तिश्च शाब्दबोधहेतु पदार्थोपस्थित्त्यनुकूल पद–पदार्थयोः सम्बन्धविशेषः। अर्थात् शाब्दबोधजनिका या पदार्थ उपस्थितिस्तस्या उपस्थितेर्जकनं यस्य पद–पदार्थयोः सम्बन्धविशेषस्य ज्ञानम्; तत्ज्ञान विषयसम्बन्ध एव पद–पदार्थयोः वृत्ति नामक सम्बन्ध इति यावत्–

**पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।**

**शाब्दबोधः फलन्तत्र शक्तिधीः सहकारिणी।।**[18]

अस्य आशयः, प्रत्यक्षस्थले यथा इन्द्रियं करणम्, इन्द्रियार्थ सन्निकर्षो व्यापारः, प्रत्यक्ष प्रमाणं च कार्यम्। अनुमान स्थले व्याप्तिज्ञानं करणम् परामर्शो व्यापारः, अनुमितिश्च कार्यं भवति, शब्दप्रमाणस्थले पदज्ञानं करणम्, पदार्थस्मरणं व्यापारः शाब्दबोधश्च कार्यमुच्यते। व्यापारवद् असाधारणं कारणं करणं भवति। प्रकृते शाब्दबोधरूपफले पदज्ञानम् अर्थात् पदश्रवणे सति पदस्य श्रावणप्रत्यक्षात्कं पदविषयकं ज्ञानं करणं भवति। शाब्दबोधे पदार्थधीः अर्थात् पदज्ञानजन्यपदार्थस्मरणं व्यापारो भवति। शक्तिज्ञानञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वरूपः। अत्र 'तत्' पदं करणं बोधकम्। अतः करणजयत्वे सति करणजन्य–उत्पादकत्वं व्यापारत्वम्–इति आशयः। प्रकृते पदजन्य–पदार्थस्मरणरूपो व्यापारः पदज्ञानरूपकरणजन्योऽस्ति, अथ च शाब्दबोध रूपफलस्य जनकोऽप्यसतीति संघटते व्यापार लक्षणम्। तदित्थं शब्दात्मक–वाक्यार्थबोधरूपः शाब्दबोध पदज्ञानरूपकरणस्य फलांभवति, करणस्य फलक्त्वनियमात् इति निर्गलितोडर्थः।

एकार्थीभावे संख्या विशेषो भवति वाक्ये– राज्ञः पुरुषः राज्ञां पुरुषः इति समासे सङ्ख्याविशेषो न भवति। राजपुरुषः इत्येव भवति वाक्ये उपसर्जनपदानि विभक्ति अर्थाभिधायित्वात् सङ्ख्याविशेषयुक्तं स्वार्थं प्रतिपादयन्ति। भर्तृहरिणा–

**भेदानां वा परित्यागात् सङ्ख्यात्मा स तथाविधः।**
**व्यापाराज्जातिभागस्य भेदापोहेन वर्तते।।**
**अगृहीतविशेषेण यथा रूपेण रूपवान्।**
**प्रख्यायते न शुक्लादिभेदरूपस्तु गृह्यते।।**[19]

व्यक्ताभि धानं भवति वाक्ये– ब्राह्मणस्य कम्बलास्तिष्ठति इति समासे पुनर्व्यक्ताभिधानम् ब्राह्मणकम्बलस्तिष्ठति इति। उपसर्जनविशेषणं भवति वाक्ये– ऋद्धस्य राज्ञः पुरुषः इति। समासे न भवति राजपुरुषः इति। वृत्तौ तु उपसर्जनभूतस्वार्थमर्थान्तरं प्रत्यायतीति अयोग्यत्वात् विशेषणेन न सम्बध्यते। चयोगो भवति वाक्ये–चयोगः–स्वचयोगः स्वामिचपोगश्चेति द्विधा भवति। राज्ञः गौश्च अश्वश्च पुरुषचेति। समासे च भवति राज्ञः गलाश्वपुरुषः स्वामिचयोगः– देवदत्तस्य च यज्ञदत्तस्य च विष्णुमित्रस्य च गौः इति। समासे तु न भवति। पदार्थानां भिन्नत्वात् भेदनिबन्धसमुच्चयद्योतनाय च शब्दः प्रयुज्यते। वृत्तौ तु समूहलक्षणैकार्थेप्रादुर्भावात् अनया रीत्या महाभाष्ये एकार्थीभावफलानि विशदीकृतानि केयटो घोतपोः स्पष्टं व्याख्यातानि च । एवं शास्त्रान्तरेषु व्याकरण शास्त्रे, लोके च वृत्तिशब्दस्य नानार्थको वर्तते। तत्र नैयायिकैः 'सङकेतो लक्षणाचार्थे पदवृतिः' इति उक्त्वा शक्तिः लक्षणा चेति वृत्ति द्वविध्यं मन्यते। व्यञ्जनान्तु अनुमितावेवान्तभवियन्ति ते। अतस्तेषां मते शक्तिलक्षणान्यरत्वमपि वृत्तिलक्षणं भवितुमर्हति। मीमांसकास्तु अभिधा–लक्षणा–गौणीति भेदेन वृत्ति सविद्धं[20] स्वीकुर्वन्ति। कुमारिल भट्टास्तु 'तात्पर्याख्यां' वृत्तिमपि निरूपयन्ति। शब्दार्थ योर्नित्यः सम्बन्धो वैयाकरणैः स्वीक्रियन्ते। तस्य सम्बन्धस्य किं स्वरूपमिति जिज्ञासायामुच्यते यद् मुनित्रयास्य

पाणिनि–कात्यायान–पतञ्जलीनां सूत्र–वार्तिक–भाष्येषु शब्दार्थयो सम्बन्धस्वरूपाव बोधकं स्पष्टरूपेण किमपि नोपलब्धं भवति। नित्यता द्विविधा प्रोक्ता कूटस्थनित्यता, प्रवाहनित्यता च। लौहकारोपकारण विशेषः 'अयोधनः कूटमुच्यते। तत्र लौहकारै र्लौहं संस्थाप्य मुद्गरैस्ताड्यते। तद्वत् यतिष्ठति स कूटस्थः। जायते–अस्ति–विपरिणमते–अपक्षीयते–विनश्य तीति षड्भाव विकार–रहितत्वरूपा कूटस्थनित्यता। सा च संसर्गानित्यता–परिणाम नित्यता–प्रध्वंसानित्यतानां स्वरूपविरोधानेन[21] पररूपभासः। अपरा च नित्यता–प्रवाहनित्यता, प्रवाहषतितानां विनाशित्वेऽपि तद्वृत्तिधर्मो न विहन्यते आश्रयप्रवाहाविच्छेदात्। नित्यतोऽयं तद्वृत्तिधर्मो न विहन्यते आश्रयप्रवाहाविच्छेदात्। नित्यतेऽयं कार्यशाब्दिकानाम् मते। शब्दार्थास्तादात्म्यमेवशक्तिः। स्पष्टञ्चेदं पातञ्जलमहाभाष्ये इति मञ्जूषाया यस्माभिर्हर्य्यादि सम्मतततयोपपादितम् इति पस्पशाह्निकादौ 'अथ गौरित्पत्र कः शब्दः'[22] इति एतद् भाष्य प्रदीपोद्घोतनावसरे भट्टनागेशेन यद् उपन्यस्तम्, तेनापीदं सङ्केतितं यद् हर्यादिसम्मतमेतत् सम्बन्धस्वरूपं न तु पतञ्जलिसम्मतम्। दर्शनेषु अपि मीमांसादर्शन सिद्धस्यैव शब्दार्थसम्बन्धस्याङ्गीकरणेऽन्तकरणं साक्षितां ददाति, यत चतुर्दशसूत्रमूलकं पाणिनिशास्त्रं वेदमुखम्; प्रधानं षडङ्गेषु व्याकरणम्' इति परस्पशाह्निके पतञ्जल्युक्ते–

**चत्वारि शृङ्गाा त्रयोडस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य**
**त्रिधा बद्धो वृषभो रोरवीति महोदेवो मत्यां आ विशेष।।**[23]

भाष्यकृता 'सिद्धे शब्दार्थ सम्बन्धे' इति कात्यायनवार्तिक विवृण्वता सिद्धे शब्दे शब्दे अर्थे सम्बन्धे चे त्येवमुक्तवार्तिकप्रदर्शर्नावसरे के खलु पदार्थं मत्वेष विग्रहः क्रियते। इति परिप्रश्नस्य अथवा द्रव्य एवं पदार्थे एष विग्रहो न्याय्यः इति समाधानं विहितम्।

वाक्यपदीयकारः शब्देन अर्थस्याभिधाने सम्बन्धमेव हेतुत्वेन मनुते। अन्यथा सर्वः शब्दः सर्वम् अर्थम् प्रत्याययेत्। घट शब्देन च घट–घटत्व–समवाय–पुंस्त्वेतर–पटाद्यर्थोऽपि अवबुद्ध्येत। अतः च उक्तं हरिणा–

**ज्ञानं प्रयोक्तुर्बाह्योऽर्थः स्वरूपञ्च प्रतीयते।**
**शब्दैरुच्चरितैस्तेषां सम्बन्धः समवस्थितः।।**[24] **इति।**

अर्थात् उच्चरितैः प्रयोगाभिज्वलितैः ध्वनिभिरभिव्यक्तैर्षा, शब्दः घट–पटादि शब्दैः, स्वरूपं आत्मीयं रूपम्। ज्ञानम्– घटादिविषयकं ज्ञानम्–एतत् त्रितयं सतः प्रतीयते। शब्दार्थ बोधस्यानादित्वाद–नादिरेव शब्दार्थ सम्बन्धो वाच्य–वाचक भावात्मिकाया अभिधायाः नियामकः। 'सिद्धे शब्दार्थ सम्बन्धे' इति कात्यायन वार्त्तिकम् औत्पति कस्तु शब्दास्यार्थेन सम्बन्धः 'इत्यादि जैमिनीसूत्रश्च उपोद्बलाकम्। अत्रापि शब्दार्थसम्बन्धस्यानादिता प्रावाहिकी नित्यतैव। उभावि सम्बन्धौ तादात्यम् लकावेव।

**वैयाकरणभूषवसारे–**

इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादि रर्थैः शब्दानां सम्बन्धो योग्यता तथा।।[25]

इति भर्तृहरिपद्यम् अर्थबोधकारणतारूपयोग्यतापरमेव शक्तिस्वरपतयाडङ्गीकृतम् भेदाभेदघटित–तादात्म्यलक्षणसम्बन्धस्तु घट प्रदीपसम्बन्धवदेव शक्त्युपकारक तया स्वीकृतो, न तु शक्त्या–रव्यसम्बन्धरूपतयेति भावः।

नागेशमतम्, ईश्वरेच्छात्मिका नैययिको–शक्तिमस्वीकृत्य पदपदार्थयोः वाच्य–वाचक भावात्मकः शब्दार्थो भयनिष्ठोऽखण्डः पदार्थान्तररूपः सम्बन्धविशेष एव शक्तिरिति मनुते। स च वाच्य–वाचक भावो न बोधविषयत्वबोधजन्त्वघटितो, न वा वाच्य वाचकत्वघटितोडपितु अखण्डः पदार्थान्तर एव। प्राचीनवैयाकरणसम्मतस्य बोधजनकत्वस्य शक्तित्वं निरस्यति। तादात्म्यस्य सम्बन्धत्वन्तु स्वीकरोति, किन्तु शक्तित्व–तस्य नाङ्गी करोति अपितु शक्तिग्राहकत्वन्तस्य स्वीकरोति। शक्तिग्राहकत्वेन च तस्य क्वचित् शक्तिपदव्यवहार्यत्वमपि।

न्याय–वैशेषिकदर्शनानुसारं शक्ति शब्दार्थ व्यवस्थार्थं स्वाभाविकम् अर्थात् अनादिं सम्बन्धं मन्वानयोः मीमांसक शाब्दिकयोः मतनिरसनाय महर्षिणा कणादेन 'सामयिकः शब्दादर्थ प्रत्ययः'[26] (वैशेषिक सूत्र) इति वैशेषिक सूत्रं प्राणायि। तत्र समयः तद्धीनः सामयिकः। यथा–नकुल दष्ट्रागस्पृष्टा या काचनौषधिः सा सर्वापि सर्पविषं हन्तीति शंकर मिश्रः। अत्रः समयः 'अस्य शब्दस्ये दमर्थ–जातमभिधेयम्' इति अभिधानाभिधेयनियमनियोगः। तस्मिन् ज्ञाते शब्दादर्थसम्प्रत्ययो भवति। सङ्केतो हि द्विविधः आधुनिक ऐश्वरीयो नित्यश्च। प्रथमस्तवात् 'परिभाषा' पदव्यवहार्य्यः। अयमेव शक्ति परिभाषायोरपि भेदः। परिभाषाया बोधकः पारिभाषिकः शक्त्या च बोधको 'वाचक' इत्यपि विशेषः। तथा हि पदवाक्यरत्नाकरे– सङ्केतो द्विविधो नित्यो जन्य इत्यादिमोडमिधा।[27] वैयाकरणास्तु न सहन्ते इच्छाशक्तिं पद–पदार्थयोः सम्बन्धरूपेण।

सम्बन्धो हि– सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः। यथा घटवद्भूतलम्– इत्यादौ संयोगरूपः सम्बन्धः सम्बन्धिम्यां भिन्नो द्विष्ठो 'घटनिरूपित–संयोगाश्रयो भूतलमिति विशिष्टबुद्धि नियमाकश्च। न हि तथा ''घट'' शब्दः इच्छावान्, कम्बुग्रीषादिमदर्थो वा इच्छावान्– इति व्यवहारः।

एवं शास्त्रा–तरेषु व्याकरणशास्त्रे, लोके च वृत्तिरूपं विषये नानार्थको वर्तते। व्याकरणशास्त्रे विशेषतः कृतद्धितसमासै–कशेषसनाद्यन्तधातवः, पञ्च वृत्यः रत्यत्र वृतिशब्दस्य परार्थाभिधानम् इत्यर्थः। तस्यैव एकार्थीभावः इति नामान्तरमिति लेखेऽस्मिन् यथामति प्रतिपादितमिति। मीमांसायां शब्दार्थयोः सम्बन्धः स्वाभाविकः अनादिः पदार्थान्तररूपः शक्ति आरव्यः स्वीकृत तथैव शब्दशास्त्रेऽपि ऐकमत्येन सर्वैरभ्युपेयते। स च शब्दार्थ सम्बन्धः शक्तिनाम्ना अभिधानाम्ना वाच्य–वाचक–भावेन, प्रत्यय्य–प्रत्ययाक भावषदेन च व्यपदिश्यते। शब्दार्थ सम्बन्धस्ये श्वरेच्छात्म कत्वेऽपि ईश्वरमादायानादित्वाक्षतेः। पदार्थान्तरत्वमपि नैयायिकाञ्चुपगतं शक्तौ

कारणत्वातिरिक्तत्वानभ्युपगमप्रयुक्तमेव। वस्तुत एकात्मकमेव वस्तु तत्र तत्र शास्त्रेषु भिन्न–भिन्न शब्दैर्व्यपदिष्ट सम्भवति। तादात्म्यमेव शब्दार्थयोः सम्बन्धं शक्तिरूपं मन्वानेनाऽपि शब्दार्थयोर्वाच्य–वाचक–भाव प्रत्याय्य–प्रत्यायक भावादिव्यपदेश्यो नापलप्यते। साङ्ख्यदर्शनेऽपि वेदस्य अपौरुषेयत्वेन वैदिक शब्दार्थयोः स्वाभाविकी शक्तिः, लौकिक शब्दार्थ योस्तु साङ्केनिकी। यथा उक्तं 'निजशक्तिः व्युत्पत्तिः व्यवच्छिद्यते' इति सांख्यसूत्रे। शब्दास्यायमर्थः इत्येवरूप्यां व्वविच्छिद्यते व्यावर्त्योपदिश्यते, न तु आधुनिक–शब्दवत् स्वयं सङ्केत्यते येन पौरुषेय त्वापेक्षा स्यात् इति। अतः वृत्ति सम्पूर्ण शब्दस्यार्थ इति कथ्यते।

**सन्दर्भ ग्रन्थ सूची :**


1. वार्त्तिवार्तिकम्
2. अष्टाध्यायी
3. सिद्धान्तकौमुदी
4. महाभाष्ये पस्पशाह्निके
5. महाभाष्यम्
6. न्यायसूत्र 2.1.55
7. अष्टाध्यायी
8. सिद्धान्त कौमुदी कारकम् (2.3.2)
9. पाणिनी सूत्र– 2.4.24
10. वाक्यपदीयम्
11. वाक्यपदीयम्
12. अष्टाध्यायी (6.1.84)
13. वाक्यपदीये
14. सिद्धान्त कौमुदी समास प्रकरणे
15. तर्कभाषा प्रमाणे
16. तर्कभाषा प्रमाणे
17. महाभाष्ये 2.1.1
18. शब्दकाण्डे
19. वाक्यपदीये
20. साहित्यपदर्पणे

21. वाक्यपदीये स्फोटे
22. शब्दकौस्तुभ
23. ऋग्वेदे 4.58.3
24. वाक्यपदीये का0 3.3.1
25. वैयाकरणभूषणसारे
26. मीमांसादर्शने
27. शब्दशक्ति प्रकाशिका